This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥गुरुःशरणं॥ ॥श्रीकामाक्ष्यंबायैनमः॥ मोहांधकारनिवहंविनिहंतुमीडे मूकात्मनामपिमहाकवितावदान्यान्॥
रिरी श्रीकांचिदेशशिशिरीकृतजागरूकानेकाम्रनाथतरुणीकरुणावलोकान् १ मातर्जयंतिममताग्रहमोक्षणानि माहें
द्रनीलरुचिशिक्षणदक्षिणानि कामाक्षिकल्पितजगत्त्रयरक्षणानि त्वद्वीक्षणानिवरदानविचक्षणानि २ आनं
गतंत्रविधिदर्शितकौशलानामानंदमंदपरिघूर्णितमंथराणां तारल्यमंबतवताडितकर्णसीम्नां कामाक्षिखेलतिक
टाक्षनिरीक्षणानां ३ कल्लोलितेनकरुणारसवेल्लितेन कल्माषितेनकमनीयमृदुस्मितेन मामंचितेनतवकिं
चनकुंचितेनकामाक्षितेनशिशिरीकुरुवीक्षितेन ४ साहाय्यकंगतवतीमुहुरर्जुनस्यमंदस्मितेनपरितोषितभीमचे
ताः कामाक्षिपांडवचमूरिवतावकीना कर्णांतिकंचलतिहंतकटाक्षलक्ष्मीः ५ अस्तंक्षणान्नयतुमेपरितापसू
र्यमानंदचंद्रमसमानयतांप्रकाशं कालांधकारसुषुमांकलयन्दिगंते कामाक्षिकोमलकटाक्षनिशागमस्ते ६
ताटंकमौक्तिकरुचांकुरदंतकांतिः कारुण्यहस्तिपशिखामणिनाधिरूढः उन्मूलयत्वशुभपादपमस्मदीयं कामा
क्षितावककटाक्षमतंगजेंद्रः ७ छायाभरेणजगतांपरितापहारी ताटंकरत्नमणिपल्लवतल्लजश्रीः कारुण्यना
म मविकिरन्मकरंदजालं कामाक्षिराजतिकटाक्षसुरद्रुमस्ते ८ सूर्याश्रयप्रणयिनीमणिकुंडलांशुलौहित्यकोकनद
काननमाननीया यांतीतवस्मरहराननकांतिसिंधुं कामाक्षिराजतिकटाक्षकलिंदकन्या ९ प्राप्नोतियंसुकृतिनंतव

Accession No: - ~~7408~~ M1189.
Title:- कटाक्षशतक
Author:- श्रीमूककविसार्वभौम
Subject:- ?
Date:- ?
पत्रे — 12

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू.प.
१

पक्षपाता[redacted]कामाक्षि[redacted]वीक्षणविलासकलापरं श्री संघस्तमेव किं न मुक्तिवधूर्वृणीते तस्मान्नितांतमनयोरिद
मेकमस्तु १० यांती सदैव मरुतामनुकूलभावं भ्रूवल्लिशार्ङ्गपरुषत्रसितारसार्द्रा कामाक्षि कौतुकतरंगितनीलकंठाका
दंबिनीव तव भाति कटाक्षमाला ११ गंगांभसि स्मितमये तपनात्मजेव गंगाधरोरसि नवोत्पलमालिकेव वक्त्रप्रभा
सरसि शैवलमंडलीव कामाक्षि राजति कटाक्षरुचिच्छटा ते १२ संस्कारतः किमपि कंदलितान् रसज्ञकेदारसीम्नि सु
धियामुपभोगयोग्यान् कल्याणसूक्तिलहरीकलमांकुरान्नः कामाक्षि कंदलयतु त्वदपांगमेघः १३ चांचल्यमेव नि
यतं कलयन्प्रकृत्या मालिन्यभूः श्रुतिपथाक्रमजागरूकः कैवल्यमेव किमु कल्पयते नतानां कामाक्षि चित्रमपि ते करुणा
कटाक्षः १४ संजीवने जननि चूतशिलीमुखस्य संमोहने शशिकिशोरकशेखरस्य संस्तंभने च ममतात्ताग्रहचेष्टितस्य
कामाक्षि वीक्षणकलापरमौषधं ते १५ नीलोपि रागमधिकं जनयन्पुरा[redacted]रेलोलोपि भक्तिमधिकां दृढयन्नराणां वे
क्रोपि देवि नमतां समतां वितन्वन् कामाक्षि नृत्यतु [redacted] मयि त्वदपांगपातः १६ कामद्रुहो हृदययंत्रणजागरूका कामाक्षि चंचलदृगंचल
मेखलाते आश्चर्यमेव भजतां झटिति [redacted] स्वकीयसंपर्क एव विधुनोति समस्तबंधान् १७ कुंठीकरोतु विपदं मम कुंचितभ्रूचापांचितः श्रित
विदेहभवानुरागः रक्षोपकारमनिशं जनयन् जगत्यां कामाक्षि राम इव [redacted] ते करुणाकटाक्षः १८ श्रीकामकोटि शिवलोचनशोषि
तस्य [redacted] शृंगारबीजविभवस्य पुनः प्ररोहे प्रेमांभसार्द्रमचिरात्प्रचुरेण शंके केदारमंब तव देवि कटाक्षपातं १९ माहा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मरोद्धाधिरसौ तवदुर्विलंघ्यसंसारविंध्यगिरिकुंठनकेलिचंचुः धैर्यांबुधिं पशुपतेश्चुलुकीकरोति कामाक्षि वीक्षणविजृंभणकुंभ
जन्मा २०. पीयूषवर्षशिशिरास्फुटदुत्पलश्रीमैत्रीनिसर्गमधुरा कृततारकांतिः कामाक्षि संश्रितवतीं वपुरष्टमूर्तेर्ज्योत्स्ना
यते भवावोति त्वदपाङ्गमाला २१. अम्ब स्मरप्रतिभटस्य वपुर्मनोज्ञमम्भोजकाननमिवांचितकंटकाभम्. भृ
ङ्गीभवंति सविधे सपदापांता कामाक्षि कोमलरुचिस्त्वदपाङ्गमाला २२ केशप्रभापटलनीलवितानजालेका
माक्षि कुंडलमणिच्छविदीपशोभे कर्णे कटाक्षरुचिरंगतले कृपाख्या शैलूषकी नटति शंकरवल्लभे ते २३ अत्यंतशी
लमतं इयतुलक्षणार्धमस्तोकविभ्रममनंगविलासकंदं अल्पस्मितादृतमपारकृपाप्रवाहमक्षिप्ररोहमचिरान्मयि काम
कोटि २४ मंदाक्षरागतरलीकृतिपारतंत्र्यात् कामाक्षि मंथरतरां त्वदपांगडोलां। आरुह्य मंदमतिकौतुकशालि
चक्षुरानंदमेति मुहुरर्धशशांकमौलेः २५ त्रैयंबकं त्रिपुरसुंदरि हर्म्यभूमिरंगं विहारसरसी करुणाकटाक्षे ॥ मबाह
दासाश्च वासवमुखाः परिपालनीयं कामाक्षि विश्वमपि वीक्षणलंभनं ते २६ वागीश्वरी सहचरी निय
मेन लक्ष्मीर्भ्रूवल्लरीवशकरी भुवनानि गेहं रूपं त्रिलोकनयनामृतमंब तेषां कामाक्षि येषु तव वीक्षणपारतंत्री
२७ माहेश्वरं झडिति मानसमीनमंब कामाक्षि धैर्यजलधौ नितरां निमग्नं जालेन शृंखलयति त्वदपांगनाम्ना विस्तारितेन
विषमायुधदाशकोऽसौ २८ उन्मथ्य बोधकमलाकरमंब जाड्यस्तंबेरमं मम मनोविपिने भ्रमंतं कुंठीकुरु

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स.प.
२

ष्वरसाकुटिलापथस्सीम्ना कामाक्षितावककटाक्षमहांकुरेण २९ उद्वेल्लितस्तवकितैर्ललितैर्विलासैरुत्थायदे
वितवगाढकटाक्षकुंजात् दूरंपलाययतुमोहमृगीकुलंमे कामाक्षिसत्वरमनुग्रहकेसरीद्रः ३० स्नेहार्द्रतांविदधि
नोत्पलकांतिचोरां जेतारमेवजगदीश्वरिजेतुकामः मानोद्धतोमकरकेतुरसौधुनीते कामाक्षितावककटाक्षकृपा
णवल्ली ३१ श्रौतींव्रजन्नपिसदासरणिंमुनीनां कामाक्षिसंततमपिस्मृतिमार्गगामी कौटिल्यमेवकथमस्थि
रतांवधत्ते चौर्यंचपंकजरुचांत्वदपांगपातः ३२ नित्यंश्रुतेःपरिचितौयतमानमेव नीलोत्पलंनिजसमीपनिवास
लोलं मीत्यैवपाठयतिवीक्षणदेशिकेंद्रः कामाक्षिकिंतुतनकालिमसंप्रदायं ३३ भ्रांत्यामुहुस्तवकितस्मितफेनराशौ
कामाक्षिवक्त्ररुचिसंचयवारिराशौ । आनंदतित्रिपुरमर्दननेत्रलक्ष्मीरालंब्यदोवितवमंदमपांगसेतुं ३४ श्यामातव
त्रिपुरसुंदरिलोचनश्रीः कामाक्षिकंदलितमेदुरताकाषिः ज्योत्स्नावतीस्मितरुचापिकथंतनोति स्पर्धामहोकुवलये
श्चतथाचकोरैः ३५ कालांजनंचतवदेविनिरीक्षणंच कामाक्षिसाम्यसरणिंसमुपैतिकांत्या निःशेषनेत्रसुखभंजनग
नीषुपर्वमन्यत्रिणेत्रसुलभंतुहिनाद्रिकन्ये ३६ धूमांकुरोमकरकेतनपावकस्य कामाक्षिनेत्ररुचिनीलिमचातुरीते ॥
अत्यंतमद्भुतमिदंनयनद्वयस्य हर्षोदयंजनयतेहरिणांकमौलेः ३७ आरंभलेशसमयेतववीक्षणस्य कामाक्षि
मूकमपिवीक्षणमात्रनम्रं सर्वेशतासकललोकसमक्षमेव कीर्तिस्वयंवरणमाल्यवतीवृणीते ३८ कालांबुवाह निवहैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुःखानेपरितापहारी कामाक्षि पुष्करमधःकुरुते कटाक्षः पर्वः परःक्षणरुचा समुपैति मैत्रीमन्यस्तु संततरुचिं प्रकटीक
रोति ३९ सूक्ष्मेपि दुर्गमतरेपि गुरुप्रसादसाहाय्यकेन विचरन्नपवर्गमार्गे संसारपंकनिचयेन पतत्यमुं ते कामा
क्षि गाढमवलंब्य कटाक्षयष्टिं ४० कामाक्षि संततमसौ हरिनीलरत्नस्तंभे कटाक्षरुचिपुंजमये भवत्याः बद्धो
पि भक्तिनिगडैर्मम चित्तहस्ती स्तंभं च बंधमपि मुंचति हंत चित्रं ४१ कामाक्षि कार्ष्ण्यमपि संततमंजनं च बिभ्रन्नि
सर्गतरलोपि भवत्कटाक्षः वैमल्यमन्वहमनंजनतां च भूयः स्थैर्यं च भक्तहृदयाय कथं ददाति ४२ मंदस्मि
तस्तबकितं मणिकुंडलांशुस्तोमप्रवालरुचिरं शिशिरीकृतांगं कामाक्षि राजति कटाक्षरुचेः कदंबमुद्या
नं बकरुणाहरिणेक्षणायाः ४३ कामाक्षि तावककटाक्षमहेंद्रनील सिंहासनं श्रितवतो मकरध्वजस्य
॥साम्राज्यमंगलविधौ मणिकुंडलश्रीर्नीराजनोत्सवतरंगितदीपमाला ४४ मातः क्षणं स्नपय मां तव वीक्षि
मंदाक्षितेन तेन सुजनैरपरोक्षितेन कामाक्षि कर्मतिमिरोत्करभास्करेण श्रेयस्करेण मधुपद्युतितस्करेण ४५ प्रेमापगा
पयसि मज्जनमारचय्य युक्तः स्मितांशुकृतभस्मविलेपनश्रीः कामाक्षि कुंडलमणिद्युतिभिर्जटालः श्रीकंठमेव
भजते तव दृष्टिपातः ४६ कैवल्यदाय करुणारसकिंकराय कामाक्षि कंदलितविभ्रमशंकराय आलोकना
य तव भक्तशिवंकराय मातर्नमोस्तु परतंत्रितशंकराय ४७ साम्राज्यमंगलविधौ मकरध्वजस्य लो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म.प. णलकालिकृततोरणमाल्यशोभे कामेश्वरस्यचलदृक्पटवैजयंती यातुर्यमेतितवचंचलदृष्टिपातः ४८
३ मार्गेणमंजुकचकांतितमोवृतेनमंदायमानातुरासौ कामाक्षि दृष्टिरयतेतवशंकरायसंकेतभूमिमचिरादभिसा
श्री रिकेव ४९ व्रीडानुवृत्तिरमणीकृतसाहचर्या शैवालितांगलरुचाशशिशेखरस्य कामाक्षिकांतिसरसीं
त्वदपांगलक्ष्मीर्मंदंसमाश्रयतिमज्जनखेलनाय ५० काषायमंशुकमिवप्रकटंदधानोमाणिक्यकुंडलरु
चिंममताविरोधी श्रुत्यंतसीमनिरतःसुतरांचकास्ति कामाक्षितावककटाक्षयतीश्वरोसौ ५१ पाषाण
एवहरिनीलमणिर्दिनेषुप्रम्लानतांकुवलयंप्रकटीकरोति नैमित्तिकोजलदमेचकिमाततस्ते कामाक्षि शू
न्यमुपमानमपांगलक्ष्म्याः ५२ शृंगारविभ्रमवतीसुतरांसलज्जानासाग्रमौक्तिकरुचाकृतमंदहासा
श्यामाकटाक्षसुषमातवप्रक्रमेतत्कामाक्षिचुंबतिदिगंबरवक्त्रबिंबं ५३ नीलोत्पलेनमधुपेनचदृष्टि
पातःकामाक्षितुल्यइतितेकथमामनंति शैत्येननिंदतियदेनमिंदुपादान्पाथोरुहेणयदसौकल
हायतेच ५४ ओष्ठप्रभापटलविद्रुममुद्रितेतेभ्रूवल्लिवीचिसुभगेमुखकांतिसिंधौ कामाक्षिवारिभ
रपूरणलंबमानकालांबुवाहसरणिंकुरुतेकटाक्षः ५५ मंदस्मितैर्धवलितामणिकुंडलांशुसंपर्कलो
हितरुचिस्त्वदपांगधारा कामाक्षिमल्लिकुसुमैर्नवपल्लवैश्च भृंगैरचितेवविभातिमाला ५६ कामाक्षि छ्लः
कत्य १ रोत्पे ४ नीलोत्पलैश्च १
३

6

शीतलकृपारसनिर्झराम्भः संपर्कपक्ष्मलरुचिस्तवापांगमाला गोभिः सदा पुररिपोरभिलष्यमाणा दूर्वांकुरं
बकविडंबनमातनोति ५७ हृत्पंकजं मम विकासयतु प्रमुष्णन्नुल्लासमुत्पलरुचेस्तमसां निरोद्धा दोषानुषंगज
डतां जगतां धुनानः कामाक्षि वीक्षणविलासदिनोदयस्ते ५८ चक्षुर्विमोहयति चंद्रविभूषणस्य कामाक्षि
तावककटाक्षतमःप्ररोहः प्रत्यङ्मुखं तु नयनं स्तिमितं मुनीनां प्राकाश्यमेव नयतीति परं विचित्रं ५९ कामाक्षि
वीक्षणरुचा युधि निर्जितं ते नीलोत्पलं निरवशेषगताभिमानं आगत्य तत्परिसरं श्रवणावतंसव्याजेन नूनं
मभयार्थितमातनोति ६० आश्चर्यमंब वदनाभ्युदयावलंबी कामाक्षि चंचलनिरीक्षणविभ्रमस्ते धैर्यं
विधूय तनुते हृदि रागबंधं शंभोस्तदेव विपरीततया मुनीनां ६१ जंतोः सकृत्प्रणमतो जगदीड्यतां च ते
जस्वितां च निशितां च मतिं सभायां कामाक्षि माक्षिकझरीमिव वैखरीं च लक्ष्मीं च पक्ष्मलयति क्षणवीक्ष
णं ते ६२ कादंबिनी किमयते न जलानुषंगं भृंगावली किमुररीकुरुते न पद्मं किं वा कलिंदतनया सहते न गं
गां कामाक्षि निश्चयपदं न तवाक्षिलक्ष्मीः ६३ काकोलपावकतृणीकरणेपि दक्षः कामाक्षि बालकसुधाकर
शेखरस्य अत्यंतशीतलतमोप्यनुपारतं ते चित्तं विमोहयति चित्रमयं कटाक्षः ६४ कार्पण्यपूरपरिवर्द्धित
मंब मोहकंदोद्गतं भवमयं विषपादपं मे तुंगं छिनत्तु तुहिनाद्रिसुते भवत्याः कांचीपुरेश्वरि कटाक्षकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

~~तवनिनायशत्रांकमोलेरंमार्च्चमिराज्यसुखलाभमनेपांगवीर:~~

हारधारा ६५ कामाक्षिघोरभवरोगचिकित्सनार्थमभ्यर्थ्यदेशिककटाक्षभिषक्प्रसादात् तत्रापिदेविलभन्तेसुकृतीकदाचिदन्येनदुर्लभमपांगमहौषधंते ६६ कामाक्षिदेशिककृपांकुरमाश्रयंतोनानातपोनियमनाशितपाशबंधाः वासालयेतवकटाक्षममुंमहांतोलब्ध्वासुखंसमधियोविचरंतिलोके ६७ साकूतसल्लपितगर्भितमुग्धहासंव्रीलानुरागसहचारिविलोकनंते कामाक्षिकामपरिपंथिनिमारवीरसाम्राज्यविभ्रमदशांसफलीकरोति ६८ कामाक्षिविभ्रमबलैकनिधिर्विधायभ्रूवल्लिचापकुटिलीकृतिमेवचित्रं स्वाधीनतांमदसतिकामान ~~मार्गोन्वित: स्वयमपिप्रकटीक~~ तवाऽनिनायशत्रांकमोलेरंगार्धराज्यसुखलाभमपांगवीरः ६९ कामांकुरैकनिलयस्तवदृष्टिपात: कामाक्षिभक्तमनसांप्रददातिकामान् मार्गान्वित:स्वयमपिप्रकटीकरोतिवैराग्यमेवकथमेषमहामुनीनां ७० कालांबुवाहनिवहै:कलहायतेतेकामाक्षिकालिममदेनसदाकटाक्ष: चित्रंतथापिनितरामनुमेवदृष्टा सोत्कंठएवमरमत्तेकिलकंठः ॥७१ कामाक्षिमन्मथरिपुंप्रतिमारतापमोहांधकारजलदागमनेनन्त्सन् दुष्कर्मकंचुकिकुलंकवलीकरोतुव्यामिश्रमेचकरुचिस्त्वदपांगकेकी ७२ कामाक्षिमन्मथरिपोरवलोकनेषुकांतंपयोजमिवतावकमक्षिपातं प्रेमागमोदिवसवद्विकचीकरोतिलज्जाभरोरजनिवन्मुकुलीकरोति ७३ मूकोविरिंचतिपरंपुरुष:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुरूपाः कंदर्पीति त्रिदशराजीति किंपचानाः कामाक्षि केवलमुपक्रमकाल एव लीलातरंगितकटाक्षरुचः क्षणांते ७४
नीलालकामधुकरंति मनोजनासामुक्तारुचः प्रकटकंदविसांकुरंति कारुण्यमंबमकरंदंति कामकोटिमन्ये ततः क
मलमेव विलोचनं ते ७५ आकांक्ष्यमाणफलदानविचक्षणायाः कामाक्षि तावककटाक्षमधेनोः संपर्क एव ककका
थमंबविमुक्तपाशबंधाः स्फुरंति तनुभृतः पशुतां त्यजंति ७६ संसारघर्मपरितापजुषां नराणां कामाक्षि शीतलत
राणि तवेक्षितानि चंद्रातपंति घनचंदनकर्दमंति मुक्तागुणंति हिमवारिनिषेचनंति ७७ प्रेमांबुरा
शिसततस्नपितानि चित्रं कामाक्षि तावककटाक्षनिरीक्षणानि संधुक्षयंति मुहुरिंधनराशिरीत्या मा
रद्रुहो मनसि मन्मथचित्रभानुं ७८ कालांजनप्रतिभटं कमनीयकांत्या कंदर्पतंत्रकलया कलितानु
भावं काचिद्विहाररसिके कलुषार्तिचोरं कल्लोलयस्व मयि ते करुणाकटाक्षं ७९ क्रांतेन मन्मथमदेन
विमोह्यमानस्वांतेन चूततरुमूलगतस्य पुंसः कांतेन किंचिदवलोकय लोचनस्य प्रांतेन मां जननि कां
चिपुरीविभूषे ८० कामाक्षि केपि सुजनास्त्वदपांगसंगे कंठे न कंदलितकालिमसंप्रदायाः उत्तंसकल्पितच
कोरकुटुंबपोषा नक्तंदिवप्रसवभूनयना भवंति ८१ नीलोत्पलप्रसवकांतिनिदर्शनेन कारुण्यवि
भ्रमजुषा तव वीक्षणेन कामाक्षि कर्मजलधेः कलशीसुतेन पाशत्रयाद्वयममी परिमोचनीयाः ८२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ ५

कामाक्षिमन्मथरिपोरवलोकनेषु कांतंपयोजमिवकमपियातं प्रेमागमोदिवसवद्विकचीकरोति लज्जा

भरोरजनिवन्मुकुलीकरोति ७६ मध्येविधिं स्वगिपरोरुहसंकुरूपः कंदर्पतिनिरसनाजितिकिंपचनः कामाक्षि

केवलमुपक्रमकालएववलीलातरंगितकटाक्षरुचेः क्षणं ते ७४ नीलालकामधुरतिमनोसनासामुखरुचःप्रक

रसहुविसांकुरेति कारुण्यमेवमकरंदतिकामकोटिमन्येततःकमलमेववविलोचनंते ७५ नाकांक्षमाणफ

लदानविचक्षणायाःकामाक्षितावककटाक्षककामधेनोः संपर्कएवकथमंबविमुक्तपाशबंधाःस्फुरंतनुभृतः

पशुतांभजंति ७६ संसारघर्मपरितापजुषांनराणांकामाक्षिशीतलतराणितवेक्षितानि चंद्रातपंतिघनचंद

नकर्दमंतिमुक्तागुणंतिहिमवारिनिषेचनंति ८० अत्यंतचंचलमकृत्रिममंजनंकिंझंकारभंगिरहिताकिमुभृंगमाला॥

धूमांकुरःकिमुहुताशनसंगहीनः कामाक्षिनेत्ररुचिनीलिमकंदलीते॥८३॥कामाक्षिनित्यमयमंजलिरस्तुमु

क्तिबीजायविभ्रममदोदयघूर्णिताय॥ कंदर्पदर्पपुनरुद्भवसिद्धिदायकल्याणदायतवदेविदृगंचलाय॥८४॥

दर्वांकुरोमकरकेतनविभ्रमाणांनिंद्रांकुरोविदलितोत्पलचातुरीणां॥दीपांकुरोभवतिमिरकदंबकानांकामा

क्षिपालयतुमांत्वदपांगपातः॥८५॥कैवल्यदिव्यमणिरोहणपर्वतेभ्यःकारुण्यनिर्झरपयःकृततमज्जनेभ्यः॥

कामाक्षिकिंकरितशंकरमानसेभ्यस्तेभ्योनमोस्तुतववीक्षणविभ्रमेभ्यः॥८६॥अत्यीयएवतनमुत्पलमंबहो

छेद्यः ५

10

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामीनस्वसासरणिरंहुरूहांवाकिंवा॥ दूरीमगीनदसमंअसमंजनेचकामा।क्षिवीक्षणरूचौतवतर्कयामः॥८७॥
मिश्रीभवद्गुरलपंकिलशांकरोरःसीमांगणेकिमपिपिंरवणमादधान॥ हेलायांधूतललितश्रवणोत्पलोसौकामाक्षि
बालद्वराजमितेकटाक्षः॥८८॥प्रौढीकरोतिविदुषांनवस्तूक्तिधाटीच्यूताटवीषुबधकोकिललाल्यमाने॥माध्वी
रसंपरिमलंचनिरर्गलंतेकामाक्षिकवीक्षणविलासवसंतलक्ष्मीः॥८९॥कूलंकषंविततनुतेकरूणांवुवर्षीसार
स्वतंसुकृतिनःसुलभंप्रवाहं॥तुच्छीकरोतियमुनांबुतरंगभंगीकामाक्षिकिंतवकटाक्षमहांबुवाहः॥९०॥
जागर्तिदेवीकरुणाशुकसुंदरीतेताटंकरत्नरूचिदाडिमखंडशोणे॥कामाक्षिनिर्भरकटाक्षमरीचिपुंजमा
हेंद्रनीलमणिपंजरमध्यभागे॥९१॥कामाक्षिसत्कुवलयस्यसगोत्रभावादाक्रामतिश्रुतिमसौतवदृष्टिपातः॥
किंचस्फुटंकुटिलतांप्रकटीकरोतिभ्रूवल्लरीपरिचितस्यफलंकिमेतत्॥९२॥एषातवाक्षिसुषमाविषमायुध
स्यनाराचवर्षलहरीनगराजकन्ये॥शंकेकरोतिशतधाहृदिधैर्यमुद्रांश्रीकामकोटियदसौशिशिरांशुमौलेः॥९३॥
बाणेनपुष्पधनुषःपरिकल्प्यमानत्राणेनभक्तमनसांकरुणाकरेण॥कोणेनकोमलदृशस्तवकामकोटि
शोणेनशोषयशिवेममशोकसिंधुं॥९४॥मारद्रुहोमुकुटसीमनिलाल्यमानेमंदाकिनीपयसितेकुटि

म॰ प॰
६

लंबचरिष्णुः॥ कामाक्षि कोपरभसाद्वलमानमीनसंदेहमंकुरयति क्षणमक्षिपातः॥९५॥ कामाक्षिसेवलितकुंडलमौ
क्तिकांशुवंचत्तिलप्रवणवामरचातुरीकः॥ स्तंभेनिरंतरमपांगमये भवत्या बद्धश्चकास्तिमकरध्वजमत्तहस्ती॥९६॥
यावत्कटाक्षरजनीसमयागमस्ते कामाक्षितावदचिरान्नमतांनराणां॥ अविर्भवत्यमृतदीधितिबिंबमंबसंवि
न्मयंहृदयपूर्वगिरीद्रशृंगे॥९७॥ कामाक्षिकल्पविटपीवभवत्कटाक्षोदित्सुःसमस्तविभवंनमतांनराणां॥
भृंगस्यनीलनलिनस्यचकांतिसंपत्सर्वस्वमेवहरतीतिपरंविचित्रं॥९८॥ अज्ञातभक्तिरसमप्रसरद्विवेक
मत्यंतगर्वमनधीतसमस्तशास्त्रं॥ अप्राप्तसत्यमसमीपगतंचमुक्तेः कामाक्षिनैवतववांक्षति दृष्टिपातः
॥९९॥ अत्यंतशीतलमनर्गलकर्मपाककाकोलहारिसुलभंसुमनोभिरेतत्॥ पीयूषमेवभवदीक्षणनाम
वकिंतुकामाक्षिनीलमिदमित्ययमेवभेदः॥१००॥ इतिश्रीमूककविसार्वभौमकृतौ कटाक्षशतकं संपूर्णं॥

का॰
६

KKSU LIBRARY RAMTEK 441 106 M1184 Dist. Nagpur

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=17.10.20 13:23
,TRANSFERRED=2020/10/17 at 13:25:29
,PAGES=12
,TYPE=STD
,NAME=S0004087
,Book Name=M-1189-KATAKCHH SATAK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection